# Shri Dattatreya Stotram

# શ્રીદત્તાત્રેયસ્તોત્રમ્

## Document Information

Text title : dattAtreyastotram (nAradapurANa)

File name : datta.itx

Category : deities_misc, dattAtreya, stotra, aShTaka

Location : doc_deities_misc

Latest update : April 24, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 24, 2024

*sanskritdocuments.org*

# શ્રીદત્તાત્રેયસ્તોત્રમ્

જટાધરં પાણ્ડુરઙ્ગં શૂલહસ્તં કૃપાનિધિમ્ । (પાણ્ડુરાઙ્ગં)
સર્વરોગહરં દેવં દત્તાત્રેયમહં ભજે ॥

અસ્ય શ્રીદત્તાત્રેયસ્તોત્રમન્ત્રસ્ય ભગવાન્ નારદઋષિઃ ।
અનુષ્ટુપ્ છન્દઃ । શ્રીદત્તપરમાત્મા દેવતા ।
શ્રીદત્તપ્રીત્યર્થે જપે વિનિયોગઃ ॥

જગદુત્પત્તિકર્ત્રે ચ સ્થિતિસંહાર હેતવે ।
ભવપાશવિમુક્તાય દત્તાત્રેય નમોઽસ્તુતે ॥ ૧॥

જરાજન્મવિનાશાય દેહશુદ્ધિકરાય ચ ।
દિગમ્બરદયામૂર્તે દત્તાત્રેય નમોઽસ્તુતે ॥ ૨॥

કર્પૂરકાન્તિદેહાય બ્રહ્મમૂર્તિધરાય ચ ।
વેદશાસ્ત્રપરિજ્ઞાય દત્તાત્રેય નમોઽસ્તુતે ॥ ૩॥

હ્રસ્વદીર્ઘકૃશસ્થૂલ-નામગોત્ર-વિવર્જિત ।
પઞ્ચભૂતૈકદીપ્તાય દત્તાત્રેય નમોઽસ્તુતે ॥ ૪॥

યજ્ઞભોક્તે ચ યજ્ઞાય યજ્ઞરૂપધરાય ચ ।
યજ્ઞપ્રિયાય સિદ્ધાય દત્તાત્રેય નમોઽસ્તુતે ॥ ૫॥

આદૌ બ્રહ્મા મધ્ય વિષ્ણુરન્તે દેવઃ સદાશિવઃ ।
મૂર્તિત્રયસ્વરૂપાય દત્તાત્રેય નમોઽસ્તુતે ॥ ૬॥

ભોગાલયાય ભોગાય યોગયોગ્યાય ધારિણે ।
જિતેન્દ્રિયજિતજ્ઞાય દત્તાત્રેય નમોઽસ્તુતે ॥ ૭॥

દિગમ્બરાય દિવ્યાય દિવ્યરૂપધરાય ચ ।
સદોદિતપરબ્રહ્મ દત્તાત્રેય નમોઽસ્તુતે ॥ ૮॥

જમ્બુદ્વીપમહાક્ષેત્રમાતાપુરનિવાસિને ।

જયમાનસતાં દેવ દત્તાત્રેય નમોઽસ્તુતે ॥ ૯॥

ભિક્ષાટનં ગૃહે ગ્રામે પાત્રં હેમમયં કરે ।
નાનાસ્વાદમયી ભિક્ષા દત્તાત્રેય નમોઽસ્તુતે ॥ ૧૦॥

બ્રહ્મજ્ઞાનમયી મુદ્રા વસ્ત્રે ચાકાશભૂતલે ।
પ્રજ્ઞાનઘનબોધાય દત્તાત્રેય નમોઽસ્તુતે ॥ ૧૧॥

અવધૂતસદાનન્દપરબ્રહ્મસ્વરૂપિણે ।
વિદેહદેહરૂપાય દત્તાત્રેય નમોઽસ્તુતે ॥ ૧૨॥

સત્યંરૂપસદાચારસત્યધર્મપરાયણ ।
સત્યાશ્રયપરોક્ષાય દત્તાત્રેય નમોઽસ્તુતે ॥ ૧૩॥

શૂલહસ્તગદાપાણે વનમાલાસુકન્ધર ।
યજ્ઞસૂત્રધરબ્રહ્મન્ દત્તાત્રેય નમોઽસ્તુતે ॥ ૧૪॥

ક્ષરાક્ષરસ્વરૂપાય પરાત્પરતરાય ચ ।
દત્તમુક્તિપરસ્તોત્ર દત્તાત્રેય નમોઽસ્તુતે ॥ ૧૫॥

દત્ત વિદ્યાઢ્યલક્ષ્મીશ દત્ત સ્વાત્મસ્વરૂપિણે ।
ગુણનિર્ગુણરૂપાય દત્તાત્રેય નમોઽસ્તુતે ॥ ૧૬॥

શત્રુનાશકરં સ્તોત્રં જ્ઞાનવિજ્ઞાનદાયકમ્ ।
સર્વપાપં શમં યાતિ દત્તાત્રેય નમોઽસ્તુતે ॥ ૧૭॥

ઇદં સ્તોત્રં મહદ્દિવ્યં દત્તપ્રત્યક્ષકારકમ્ ।
દત્તાત્રેયપ્રસાદાચ્ચ નારદેન પ્રકીર્તિતમ્ ॥ ૧૮॥

॥ ઇતિ શ્રીનારદપુરાણે નારદવિરચિતં
દત્તાત્રેયસ્તોત્રં સુસમ્પૂર્ણમ્ ॥

As the colophone commonly uses, the position of the stotra in Naradapurana is not known.

Many of the printed books take first eight of the verses and call it an aShTakam.

*Shri Dattatreya Stotram*

pdf was typeset on April 24, 2024

Please send corrections to *sanskrit@cheerful.com*